दिनाङ्कः ______________

**डी.ए.वी. पब्लिकविद्यालयाः, दिल्ली –एन .सी .आर**

**विषयः – संस्कृतम्**

**आदर्शप्रश्नपत्रम् ( 2026 -27 )**

**अर्धवार्षिकी परीक्षा**

**कक्षा –षष्ठी**

**समय : - होरात्रयम्** **पूर्णाङ्का: - 80**

**निर्देशा: -**

- **अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।**
- **अस्मिन् प्रश्नपत्रे 10 पृष्ठा: 21 प्रश्ना: च सन्ति |**
- **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि ।**
- **प्रश्नसंख्या प्रश्नपत्रानुसारं लेखनीया ।**
- **प्रश्नपत्रे उत्तराणि न लेखनीयानि ।**

**खण्ड: - क ( अपठित -अवबोधनम् ) अङ्काः 10**

**1. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत -**

भारतं पर्वणाम् देशः मन्यते। विजयदशमी अपि एकम् प्रमुखम् पर्व अस्ति। एषः महोत्सवः अश्विनमासे आगच्छति। क्षत्रियाः अस्मिन् अवसरे अस्त्राणाम् शस्त्राणाम् च पूजाम् कुर्वन्ति । अस्मिन् एव दिवसे श्रीरामः दुष्टं रावणं हत्वा सीतायाः रक्षाम् अकरोत्। विजयदशमी पर्व असत्यस्योपरि सत्यस्य विजयस्य प्रतीकम् अस्ति।

**(अ) एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** **(1x2=2)**

(i) भारतस्य प्रमुखपर्व किं अस्ति ?

(ii) श्रीरामः दुष्टं कं हत्वा सीतायाः रक्षाम् अकरोत् ?

(iii) भारतम् केषां देशः मन्यते ?

**(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** **(2x2=4)**

(i) विजयदशमी पर्व कस्य प्रतीकम् अस्ति ?

(ii) अस्मिन् दिवसे क्षत्रियाः किम् कुर्वन्ति ?

(iii) श्रीरामः कस्याः रक्षाम् अकरोत्?

**(इ) निर्देशानुसारम् उत्तरत-(केवलं प्रश्नचतुष्टयम् )** **(1x4 =4)**

(i) ‘विजयदशमी अपि एकम् प्रमुखम् पर्व अस्ति |’ अत्र क्रियापदं किम् अस्ति ?

(क) एकम् (ख) प्रमुखम् (ग) अस्ति (घ) पर्वम्

(ii) ‘अस्त्राणाम् शस्त्राणाम् च पूजाम् कुर्वन्ति |’ अस्मिन् वाक्ये अव्ययपदं किम् अस्ति ?

(क) च (ख) अस्त्राणाम् (ग) शस्त्राणाम् (घ) पूजाम्

(iii) अनुच्छेदे 'पराजयस्य' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(क) भारतम् (ख) रक्षाम् (ग) विजयस्य (घ) पर्वम्

(iv) 'दुष्टम् रावणम्' अत्र विशेषण पदं किम् अस्ति ?

(क) दुष्टम् (ख) अकरोत् (ग) रावणम् (घ) सीतायाः

(v) ‘एषः महोत्सवः अश्विनमासे आगच्छति |’ अत्र कर्तृपदं किम् अस्ति ?

(क) महोत्सवः (ख) अयम् (ग) अश्विन (घ) आगच्छति

**खण्ड : - ख (रचनात्मक- कार्यम्) (15 अंकाः )**

**2. प्रधानाचार्यां प्रति लिखिते प्रार्थनापत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूर्णं कृत्वा पूर्णपत्रं पुनः लिखत- 1x 5 = 5**

दिनाङ्कः _________

(i) ___________

आदरणीया प्रधानाचार्या महोदया

क०ख०ग० विद्यालय:

नव दिल्ली

( ii) ___________!

सविनयं निवेदनम् अस्ति यत् अर्द्ध- वार्षिक परीक्षायाम् अनुपस्थितकारणात् अहं दण्डित: अभवम्। वस्तुत: अहं तेषु दिवसेषु रोगग्रस्त: आसम् । मम पिता (iii)___________बहि: आसीत्। गृहे मम (iv)__________एव एकाकिनी आसीत्।सा अहर्निशं मम सेवायाम् व्यस्ता आसीत्। अत: अहं प्रार्थनापत्रम् अपि प्रेषितुम् असमर्थ: आसम् । अयं मम प्रथम: अवसर: आसीत्।आशासे यत् भवती मम दण्डं क्षमयित्वा माम् अनुग्रहिष्यति।

भवत्याः शिष्य:

(v)_______

| |
|---|
| **मञ्जूषा-** महोदया, अमन:, कार्यवशात्, सेवायाम्, माता |

3. **चित्रं दृष्ट्वा मञ्जूषाया: उचितपदानि चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं पुनः लिखत - 1x 5 = 5**




1. एतत् __________ चित्रम् अस्ति |
2. एक: छात्र: __________ पठति |
3. _________ बसयानस्य प्रतीक्षां कुर्वन्ति |
4. सर्वे जना: __________ सन्ति |
5. अत्र एकं _______ विक्रेता अस्ति |

| |
|---|
| **मञ्जूषा –** बसयानम्, बसस्थानकस्य, प्रसन्ना:, जना:, समाचारपत्रं |

4. **अधोलिखितं संवादं मञ्जूषायां प्रदत्तवाक्यै: पूरयित्वा पुनः लिखन्तु- 1x5 = 5**

राघवः - सीमे ! प्रातः कुत्र गच्छति?

सीमा - (i) -------------------------------------------------------

राघव: - त्वं कया सह विद्यालयं गच्छसि?

सीमा - (ii) -------------------------------------------------------

राघवः - त्वं किमर्थं विद्यालयं गच्छसि?

सीमा - (iii) -------------------------------------------------------

राघव: - विद्यालये किं किं भवति?

सीमा - (iv) -------------------------------------------------------

राघव: - विद्यालयं गत्वा कः लाभः भवति?

सीमा - (v) -------------------------------------------------------

**मञ्जूषा**

- विद्यालयं पठनम्, लेखनम्, क्रीडनम् च भवति|
- विद्यालयं गत्वा ज्ञानवर्धनस्य लाभः भवति।
- अहं सीमया सह विद्यालयं गच्छामि ।
- प्रातः अहं विद्यालयं गच्छामि ।
- अहं विद्यालयं पठनार्थं गच्छामि।

**अथवा**

**अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत -** **1x 5 = 5**

उद्याने एकः (i)________ अस्ति । तस्य वृक्षस्य उपरि एकं नीडम् अस्ति। नीडे एकः खगः (ii) ________ सह निवसति । वर्षाकालः आगच्छति । खगः नीडे सुखेन तिष्ठति । तदा एकः वानरः तत्र (iii)________ । शीतेन सः दुःखी अस्ति। खगः वानरम् पश्यति कथयति च – 'मित्रं ! तव शरीरं निर्बलम् अस्ति। त्वम् (iv)________ निर्माणं किमर्थम् न करोषि ? किमर्थम् शीतपीडाम् अनुभवसि? वानरः (v) ______वचनम् शृणोति कुपितः च भवति । सः वृक्षम् आरोहति खगस्य नीडं नष्टं करोति। सत्यम् एव उक्तम् अस्ति - 'व्यर्थः मूर्खोपदेश: भवति' ।

**मञ्जूषा –** नीडस्य, आगच्छति, परिवारेण, आम्रवृक्ष:, तस्य

## खण्ड : - ग (अनुप्रयुक्त -व्याकरणम्) ( 25 अङ्का: )

**5. वाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धि-विच्छेदं वा कृत्वा पूर्णवाक्यं लिखत- (केवलं प्रश्नद्वयम्) (1x 2 = 2)**

(i) सः <u>हिमालयं</u> गच्छति ।
(ii) स्वामी <u>दयानन्दः</u> अस्ति ।
(iii) पाचकः <u>भोजन + आलये</u> अस्ति ।

**6. निर्देशानुसारं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम् )** **1x 4 = 4**

(i) बालक - तृतीया - एकवचनम्

(ii) बालिका - प्रथमा - बहुवचनम्

(iii) मित्र - चतुर्थी - एकवचनम्

(iv) किम् (पुल्लिङ्गम्) - षष्ठी - एकवचनम्

(v) किम् (स्त्रीलिङ्गम्) - प्रथमा - बहुवचनम्

**7. उचितं संख्यावाचकं पदं प्रयुज्य पूर्णवाक्यं लिखत- (केवलं प्रश्नत्रयम्) 1x 3 = 3**

(i) विद्यालये ---------------- (20) पुस्तकानि सन्ति।
(क) अष्टादश (ख) त्रिंशत् (ग) नवदश (घ) विंशतिः

(ii) अस्माकं विद्यालये --------------- (15) शिक्षकाः सन्ति।
(क) चतुर्दश (ख) पञ्चदश (ग) षोडश (घ) नवदश

(iii) उद्याने-------------- (25) पुष्पाणि सन्ति।
(क) पञ्चविंशति : (ख) षड्विंशतिः (ग) सप्तविंशतिः (घ) अष्टाविंशतिः

(iv) -------------------- (1) बालकः क्रीडति।
(क) एकः (ख) एका (ग) एकम् (घ) द्वौ

**8. अधोलिखितानां शब्दानां वर्णविच्छेदं वर्णसंयोजनं च लिखत -**

(अ) वर्णविच्छेदः **½ x2=1**

(i) व्+इ+द् +-----आ+ल्+अ+य् +----- = विद्यालयः
(ii) म् + _____ + ष् + अ + _____ + अः = मूषकः

(आ) वर्णसंयोजनम् **1x2= 2**

(iii) ह् +अ + र् + ष्+ अः = --------------
(iv) क् + अ + म् + अ + ल् + अ + म् = -----------------

**9. अधोलिखितेषु रेखाङ्कित-पदेषु विभक्तिं तत्कारणं च लिखत- (केवलं प्रश्नत्रयम् ) (1 x 3=3)**

| वाक्यम् | विभक्तिः | कारणम् |
|---|---|---|
| (i) **<u>मार्गम्</u>** उभयतः वृक्षाः सन्ति। | ____________ | ____________ |
| (ii) सः **<u>गृहम्</u>** प्रति पश्यति \| | ____________ | ____________ |
| (iii) **<u>जलं</u>** विना जीवनम् न अस्ति। | ____________ | ____________ |
| (iv) **<u>विद्यालयम्</u>** अभितः उद्यानम् अस्ति \| | ____________ | ____________ |

**10. निर्देशानुसारं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम् ) 1x4=4**

(i) अस् - लट् लकारः - प्रथम - बहुवचनम्

(ii) गम् - लङ् लकारः - मध्यमः - बहुवचनम्

(iii) भू लृट् लकारः - प्रथमः - द्विवचनम्

(iv) नम्  लङ् लकारः -  मध्यम: -  एकवचनम्

(v) वद्  लृट् लकारः -  उत्तम: -  बहुवचनम्

**11. अधोलिखितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत- (केवलं प्रश्नद्वयम्)** **1x 2=2**

(i) चल् + क्त्वा = ------------------

(ii) पठ् + क्त्वा = --------------------

(iii) गत्वा = ------------ + -------------

**12.मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत्- (केवलं प्रश्नद्वयम्)** **1x 2=2**

(i) हरिणः-------------- अस्ति ?

(ii) रामः श्यामः ------------------ खेलतः |

(iii) अहम् -------------- पश्यामि |

**मञ्जूषा –**

| |
|---|
| च, कुत्र, अत्र |

**13. अधोलिखितेषु पदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत -(केवलं प्रश्नद्वयम्)** **1x 2=2**

(i) उपविशति = ----------- + --------------

(ii) आगच्छति = ----------- + ---------------

(iii) प्र + भावः = --------------------

**खण्ड: - घ (पठित- अवबोधनम् ) (30 अंकाः)**

**14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **5**

अस्माकं विद्यालये अनेकानि चित्राणि सन्ति | चित्राणि सुन्दराणि सन्ति| वयं मिलित्वा सुन्दराणि चित्राणि पश्याम: | वयं मिलित्वा गीतानि अपि गायाम: | वयं मिलित्वा क्रीडाङ्गणे क्रीडाम: धावाम: च | अस्माकं अध्यापका: अध्यापिका: च स्नेहेन पाठयन्ति | वयं अपि स्नेहेन पठाम: अध्यापकानाम् च सम्मानं कुर्म: | यदा अवकाश: भवति वयं मिलित्वा एव गृहम् आगच्छाम: | वयं मिलित्वा एव गृहकार्यं कुर्म: क्रीडाम: च |

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(½ x2 =1)**

(i) कानि सुन्दराणि सन्ति?

(ii) वयं मिलित्वा कानि गायाम:?

(iii) वयं कीदृशानि चित्राणि पश्याम:?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1x2 =2 )**

(i) वयं केषां सम्मानं कुर्म:?

(ii) वयं मिलित्वा कुत्र क्रीडाम: धावाम: च?
(iii) अस्माकं विद्यालये कानि सन्ति?

**(इ) निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **(1x2 =2 )**

(i) 'वयं मिलित्वा सुन्दराणि चित्राणि पश्याम:' अत्र किं क्रियापदम् ?

(क) पश्याम: (ख) वयं (ग) चित्राणि (घ)मिलित्वा

(ii) 'गच्छाम:' इति पदस्य किं विलोमपदम् ?

(क) क्रीडाम: (ख) आगच्छाम: (ग) पश्याम: (घ) धावामः

(iii) 'वयं मिलित्वा एव गृहम् आगच्छाम:' अत्र किं कर्तृपदम् ?

(क) वयं (ख) गृहम् (ग) एव (घ) मिलित्वा

**15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **5**

सत्यं वदन्ति मधुरं च सदा वदन्ति,
ये अप्रियं किमपि नासत्यं वदन्ति ।
सज्जनाः सहृदयाः च परोपकारिणः,
श्रेष्ठाः जनाः परहिताय सुखम् त्यजन्ति ||

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(½ x 2 =1)**

(i) श्रेष्ठाः जनाः किं त्यजन्ति?
(ii) किं सज्जनाः अप्रियं वदन्ति?
(iii) के परोपकारिणः भवन्ति?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1x2 =2 )**

(i) श्रेष्ठाः जनाः कस्मै सुखं त्यजन्ति?
(ii) सज्जनाः किं न वदन्ति?
(iii) सज्जनाः सदा कीदृशं वदन्ति ?

**(इ) निर्देशानुसारम् उत्तरत--(केवलं प्रश्नद्वयम्)** **(1x 2 =2 )**

(i) 'सत्यम् ' इति पदस्य किं विलोमपदम् ?
(क) मधुरम् (ख) असत्यम् (ग) अप्रियम् (घ) श्रेष्ठ:

(ii) 'ये सदा सत्यं वदन्ति |' अत्र किं क्रियापदं ?

(क) ये (ख) सदा (ग) वदन्ति (घ) सत्यम्

(iii) 'सज्जनः' इति पदस्य किं पर्यायपदम् ?
(क)सुजनः (ख) कुशलः (ग) सुखम् (घ) मधुरम्

**16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत -** **5**

(एकदा हरिणः दूरम् गच्छति । सायङ्कालः भवति परन्तु सः न आगच्छति । मूषकः काकः कच्छपः च प्रतीक्षां कुर्वन्ति । परस्परं वार्तालापं कुर्वन्ति | )

**कच्छप:** - हरिणः कुत्र अस्ति ?

**मूषक:** - न जानामि|

(सायङ्कालः भवति परन्तु हरिणः न आगच्छति)

**मूषक:** - अस्माकम् मित्रम् अधुना अपि न आगच्छत्।

**कच्छप:** - किं सः संकटे तु न अस्ति ?

**काक:** - अहम् अत्र-तत्र पश्यामि, प्रिय मित्र हरिण: ! त्वम् कुत्र असि ? कुत्र असि त्वम् ? मित्र , मित्र हरिण! त्वम् कुत्र असि ?

**हरिण:** - त्राहि माम् त्राहि माम्

(काकः हरिणम् पश्यति। सः तस्य समीपं गच्छति। सः हरिणं पृच्छति )

**हरिण:** - एकः व्याधः माम् अबद्धत्।

**काक:** - मित्र! इदम् कथम् अभवत् ? तिष्ठ ! अहम् तव सहायतार्थम् मित्राणि आनयामि |

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **(½ x 2=1)**

(i) हरिणं क: अबद्धत् ?

(ii) क:सहायतार्थम् मित्राणि आनयति ?

(iii) काक: कस्य समीपं गच्छति?

**(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** **(1x2=2)**

(i) क: जालं कर्तिष्यति?

(ii) सायङ्कालः भवति परन्तु कः न आगच्छति?

(iii) दूरं क: गच्छति?

**(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)** **(1x2=2)**

(i) ‘अहम् अत्र-तत्र पश्यामि |’ अत्र कर्तृपदं किम् अस्ति ?

(क) पश्यामि (ख) हरिण: (ग) अहम् (घ) अत्र - तत्र

(ii) ‘एकः व्याधः माम् अबद्धत्’। अस्मिन् वाक्ये क्रियापदं किम् अस्ति ?

(क) अबद्धत् (ख) माम् (ग) व्याधः (घ) एकः

(iii) ‘शत्रुः’ इति पदस्य किं विलोमपदम् ?

(क) मित्रम् (ख) माम् (ग) हरिणः (घ) आगच्छति

**17.रेखाङ्कितपदानां स्थाने प्रश्नवाचक-पदं चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4**

(i) मत्स्यः **<u>जलस्य</u>** उपरि आगच्छति| (कं ,कस्य ,केन )

(ii) **<u>मूषकः</u>** जालं कृन्तति। ( कः, कस्य, किम् )

(iii) गुञ्जनसक्सेना **<u>विमानम्</u>** अचालयत्। ( का, किम्, कस्य )

(iv) **<u>अध्यापिकाः</u>** स्नेहेन पाठयन्ति । ( काः, कः, के )

(v) लोके **<u>चन्दनं</u>** शीतलं भवति। ( किम्, के, कस्याः)

**18. अधोलिखितं श्लोकं पठित्वा उचित:पदैः अन्वयपूर्तिं कुरुत - ½x 4 = 2**

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।**

**तस्मात् तदेव वक्तव्यं, वचने का दरिद्रता ।।**

**अन्वयः** – सर्वे (i)________ प्रियवाक्य प्रदानेन (ii) __________ । तस्मात् तत् (iii) ________ वक्तव्यम् ।

(iv) __________ का दरिद्रता ।

| **मञ्जूषा - वचने, एव, तुष्यन्ति , जन्तवः** |
|---|

**19. अधोलिखितां पठितकथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत - ½x 6 =3**

एकस्मिन् वने कच्छपः, काकः, मूषकः ,हरिणः चत्वारि (i) ________ वसन्ति । एकदा हरिणः दूरं गच्छति । (ii) _________अपि सः न आगच्छति। तस्य मित्राणि परस्परम् (iii) _________कुर्वन्ति। काकः पश्यति यत् व्याध: हरिणम् जालेन अबद्धत् । सः शीघ्रं (iv) ___________ आनयति। मूषकः जालं (v) __________ हरिणः च मुक्तः भवति। सर्वे (vi) ________भूत्वा पुनः मिलित्वा च सुखेन वसन्ति।

| **मञ्जूषा - मूषकं, प्रसन्नाः, प्रियमित्राणि, वार्तालापं, सायङ्काले, कृन्तति** |
|---|

**20. अधोलिखितशब्दानां उचितम् अर्थं मञ्जूषात: चित्वा लिखत - 1x3=3**

(i) जन्तवः - ______________

(ii) रणे - ______________

(iii) विद्यालय: - _______________

| **मञ्जूषा - युद्धे , पाठशाला , जीवा:** |
|---|

**21. उचितं विपरीतार्थकपदं मञ्जूषात: चित्वा लिखत -** **1x 3=3**

(i) सत्यम् -____________________

(ii) जय: -_____________________

(iii) प्रियं -____________________

| |
|---|
| **मञ्जूषा -** पराजय:, अप्रियम्, असत्यम् |